International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 15-19
© 2026 IJMH
www.themultijournal.com
Received: 17-04-2026
Accepted: 02-05-2026
Publish : 04-05-2026

**खेमराजः**
शोधच्छात्रः,
संस्कृत-पालि-विभागः,
हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः,
धर्मशाला

**Correspondence:**
**खेमराजः**
शोधच्छात्रः,
संस्कृत-पालि-विभागः,
हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः,
धर्मशाला

# श्रीमद्भागवतमहापुराणे नीलमतपुराणे च काश्मीरीयमहापुरुषाणां गौरवं वस्तुनिष्ठता च

**खेमराजः**

**सारांशः**

समस्तविश्वे भारतभूमेः गौरवन्तु सर्वत्रैव प्रचक्षते । तत्रापि स्वर्गतुल्यभूमौ भारतवर्षस्य काश्मीरप्रान्ते बहव आचार्याः राजन्ते तत्र कल्हणजय्यटकैय्यटश्चेत्यादीनां स्थानं सर्वोपरि विद्यते । तत्र भगवद्भास्करदेवालये आचार्यकल्हणस्य राजतरङ्गिण्याः रचनाऽभवत् । आचार्यकल्हणेन संस्कृतभाषा-यामुपनिबद्धा पद्यशैल्यां विरचिता च 'राजतरङ्गिणी' इत्याख्या रचना एकं न्यायाधीशमिव रागद्वेषविमुक्तं काश्मीरीयक्रमबद्धेतिहासस्य एकं निर्भिकं निष्पक्षञ्च काव्यं विद्यते, यत्र काश्मीरी-यप्रजायाः सभ्यतायाश्च ऐतिहासिक-धार्मिक-राजनैतिक-सामाजिक-आर्थिक-जनजीवनविषये विस्तृतं ज्ञानं प्रददाति ।

सर्वादौ वैदिकपौराणिकजैनबौद्धसंस्कृतीनां बाहुल्यमासीत् । परञ्चार्वाचीनसमये काश्मीरप्रान्ते बाहुल्येन इस्लामिकदर्शनस्य संस्कृतेश्च प्राधान्यं सम्प्राप्यते । यद्यपि आदौ वैदिकपौराणिक-जैनबौद्धदर्शनानां समन्वय एवात्रासीत् । यैः मानवतावाद-धर्मनिरपेक्षता-सहिष्णुतेत्यादीनां क्रमबद्धो विकासो बभूव । राजतरङ्गिण्यां काश्मीरप्रान्तस्य शासकानां वंशावलीनां, शासकानां नीतीनामुल्लेखः, आर्थिक-धार्मिक-भौगोलिक-सामाजिक-सांस्कृतिकेत्यादिविषयाणां सत्यनिष्ठघटनानां पक्षविपक्षाणाञ्च समुल्लेखः संराजते।

भारतीयसंस्कृतसाहित्यस्येतिहासलेखनं कस्यचित् इतिहासकारस्य दृष्टिकोणेन दार्शनिकविवेचनं विवेच्यते । यत्र इतिहासकारेण राष्ट्रियसांस्कृतिकसामाजिकप्रवृत्तीनां दिग्दर्शनस्य प्रयत्नं क्रियते । क्रमेऽस्मिन् काश्मीरप्रान्तस्येतिहासे कविवरेण कल्हणेन ११४८-५० ख्रिस्ताब्दे विविधकाश्मी-रीयप्रवृत्तीनां तुलनात्मकमध्ययनं कृत्वा व्यक्तगततथ्यानामुपरि सार्वजनिकशासकीयप्रवृत्तीनां निष्पक्ष-तया प्रस्तुतीकरणं कृतमस्ति । 'राजतरङ्गिणी' इति ग्रन्थः आत्मचिन्तनशीलप्रक्रियायाः इतिहासदर्शने प्रभावयुक्तविद्वतायाः परिष्कृतसंस्कृतस्य प्रामाणिकी उत्कृष्टकृतिरस्ति । रचनायामस्यां काश्मीरप्रान्तस्य वैज्ञानिकपद्धत्यानुरूपं वैज्ञानिकदृष्टिकोणेन विश्लेषणेन विवेचनेन च क्रमबद्धोपायैः काश्मीरस्य ऐतिहासिकबिन्दूनामनुसन्धानं कृतमस्ति ।

तत्रैतिहासिकगवेषणया उन्नतिशीलविस्तारेण गम्भीरतया च ११८४ ख्रिस्ताब्दपूर्वात् नृपात् गोनन्दात् विजयसिन्हानृपस्य ११२९ ख्रिस्ताब्दपूर्वं यावत् काश्मीरस्य प्राचीनराजवंशानां राजनैतिकपारम्परिक-घटनाः अपि सम्मेल्य व्याख्यापरकेतिहासः अप्रस्तौत् । अत्र कल्हणद्वाराविविधसंस्कृतसाहित्यस्य तथा अभिलेखानामध्ययनं कालक्रमं निर्धारयते । अत्रापि काश्मीरप्रान्तस्य राजनैतिकेतिहासस्य विषये चर्चा भविष्यति ।

राजतरङ्गिण्याः आधुनिकावधारणाभिः प्रेरितं भूत्वा प्राचीनकाश्मीरीयैतिहासिकदृष्टिकोणस्य तथ्यात्मकराजनैतिकैतिहासस्य प्रस्तुतीकरणमस्ति, येन रचनायाः अस्याः प्राथमिकस्तोत्ररूपेण तत्सम्बन्धितप्राच्यराजनैतिकविषयेभ्यः तथा समसामयिकैतिहासिकविषयेभ्यः अस्योपादेयता अत्यधिकी प्रासङ्गिकी प्रवर्तते । तथैव श्रीमद्भागवतनीलमतपुराणयोः काश्मीरीयैतिहासिकतया सह विविधविष-याणां ज्ञानमुपलभ्यते ।

पुरा काश्मीरस्थविविधधर्माणामथवा वैदिकपौराणिकजैनबौद्धसंस्कृतीनां बाहुल्यमासीत्। परञ्चाधुनि-कसमये काश्मीरप्रान्ते बाहुल्येन इस्लामिकदर्शनस्य संस्कृतेश्च प्राधान्यं सम्प्राप्यते । यद्यपि तत्रादौ

वैदिकपौराणिकजैनबौद्धदर्शनानां समन्वय एवात्रासीत् । यैः मानवतावाद-धर्मनिरपेक्षता-सहिष्णुतेत्यादीनां क्रमबद्धो विकासो बभूव । राजतरङ्गिण्यां काश्मीरप्रान्तस्य शासकानां वंशावलीनां, शासकानां नीतीनामुल्लेखः, आर्थिक-धार्मिक-भौगोलिक-सामाजिक-सांस्कृतिकेत्यादिविषयाणां सत्यनिष्ठघटनानां पक्षविपक्षाणाञ्च समुल्लेखो राजते ।

भारतीयसंस्कृतसाहित्यस्येतिहासलेखने एकस्य इतिहासकारस्य दृष्टिकोणो दार्शनिकविवेचनाधारित आसीत् । यत्र इतिहासकारद्वारा राष्ट्रियराजनैतिकधार्मिकसांस्कृतिकसामाजिकप्रवृत्तीनां दिग्दर्शनस्य प्रयत्नं क्रियते । क्रमेऽस्मिन् काश्मीरप्रान्तस्येतिहासे कविवरेण कल्हणेन ११४८-५० ख्रिस्ताब्दे विविधकाश्मीरीयप्रवृत्तीनां तुलनात्मकमध्ययनं कृत्वा न केवलं वैयक्तिगतरूपेण राजनैतिकप्र-वृत्तीनाम् अपितु सार्वजनिकधार्मिकप्रवृत्तीनां निष्पक्षतया प्रस्तुतीकरणं कृतमस्ति । 'राजतरङ्गिणी' इति ग्रन्थः आत्मचिन्तनशीलप्रक्रियायाः इतिहासदर्शने प्रभावयुक्तविद्वतायाः परिष्कृतसंस्कृतस्य प्रामाणिकी उत्कृष्टकृतिरस्ति। रचनायामस्यां काश्मीरप्रान्तस्य वैज्ञानिकपद्धत्यानुरूपं वैज्ञानिकदृष्टिकोणेन विश्लेषणेन विवेचनेन च क्रमबद्धोपायैः काश्मीरस्य ऐतिहासिकबिन्दूनामनुसन्धानं कृतमस्ति ।

तत्रैतिहासिकगवेषणया उन्नतिशीलविस्तारेण गम्भीरतया च ११८४ ख्रिस्ताब्दपूर्वात् नृपात् गोनन्दात् विजयसिन्हानृपस्य ११२९ ख्रिस्ताब्दपूर्वं यावत् काश्मीरस्य प्राचीनराजवंशेषु परिपालितेषु धार्मिककपारम्परिकघटनाः अपि सम्मेल्य व्याख्यापरकेतिहासः अप्रस्तौत् । अत्र कल्हणद्वाराविविधसंस्कृतसाहित्यस्य तथा अभिले-खानामध्ययनं कालक्रमं निर्धारयते । अत्रापि काश्मीरप्रान्तस्य राजनैतिकेतिहासस्य विषये चर्चा भविष्यति ।

राजतरङ्गिण्याः आधुनिकावधारणाभिः प्रेरितं भूत्वा प्राचीनकाश्मीरीयैतिहासिकदृष्टिकोणस्य तथ्यात्मकधार्मिकैतिहासस्य प्रस्तु-तीकरणमस्ति, येन रचनायाः अस्याः प्राथमिकस्तोत्ररूपेण तत्सम्बन्धितप्राच्यधार्मिकविषयेभ्यः तथा समसामयिकैतिहासिकवि-षयेभ्यः अस्योपादेयता अत्यधिकी प्रासङ्गिकी प्रवर्तते । अत्र श्रीमद्भागवतमहापुराणे तथा च नीलपतपुराणे काश्मीरप्रान्तस्य विविधविदुषां तथा महापुरुषाणां गौरवस्य तथा वस्तुनिष्ठतायाः विषये सविस्तरेण अत्र विस्तृता चर्चा भविष्यति, यया वयं स्वभारतवर्षस्य दिव्यतायाः विषये सम्यक् अवबोधयितुं समर्था भविष्यामः ।

**कूटशब्दाः**

विद्या, पुराणम्, हिमाचलः, महर्षिः, महापुरुषः, वेदाः, स्थानम्, दिव्यता,

**उद्देश्यानि**

क. श्रीमद्भागवतमहापुराणे वर्णितमहापुरुषाणां विषये ज्ञास्यामः ।

ख. नीलमतपुराणे वर्णितमहापुरुषाणां विषये ज्ञास्यामः ।

ग. श्रीमद्भागवतनीलमतपुराणयोः वर्णिताध्यात्मिकतत्त्वानां विषये अवबोधयिष्यामः ।

घ. नीलमतपुराणस्य सन्दर्भे सामान्यरूपेण ज्ञास्यामः ।

ङ. पुराणानां महत्त्वविषये ज्ञास्यामः ।

**प्रस्तावना**

पुरा नवं भवतीति सामान्यपुराणलक्षणात् तथा विविध-लौकिक-साहित्यस्याध्ययनेन सञ्ज्ञायते यन्मानवजीवने पुराणानां कीदृशं स्थानं विद्यते इति । पुराणानि वैदिकार्थं ज्ञातुं परमोप-योगी-साधनमिति स्वीक्रियते । तेषु पुराणेषु विविधकथानां तथा विभिन्नराजवंशानां प्रसङ्गाः विद्यन्ते । तथा हि तत्र विविधमहा-पुरुषाणामपि वर्णनं समायाति । यैः भारतीयैतिहासिकता संवर्द्धति । तत्र ये महापुरुषाः वर्णिताः सन्ति तेषां सङ्क्षिप्तजीवनस्य विषये इत्थं ज्ञास्यामः-

**1. परीक्षितः**

अभिमन्युपुत्रपरीक्षितस्य जन्म अभिमन्युमृत्य्वनन्तरं बभूव । अस्य मातुर्नाम उत्तरा इति आसीत्, या पाण्डवानां कुलवधूः आसीत् । उत्तराभिमन्य्योः पुत्रः परीक्षितः एव पाण्डवानामुत्तराधिकारी आसीत् । येन सम्पूर्णभारतवर्षे चिरकालं यावत् शशास । अश्वथामाद्वारा ब्रह्मशीरास्त्रेण कृतप्रहारसमये तस्याः वर्णनं कृतमस्ति, तद्यथा

**पाहि पाहि महायोगिन् देव देव जगत्पते ।**
**नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम्**[1] ॥

नीलमतपुराणेऽपि परीक्षितस्य नामस्मरणं क्रियते । तद्यथा

**परीक्षिद्वंशभृच्छ्रीमान् नृपतिर्जनमोजयः ।**
**पप्रच्छ शिष्यं व्यासस्य वैशम्पायनमन्तिकात्**[2] ॥

धर्मात्मनः परीक्षितस्यानुरोधेनैव महर्षिशुकदेवेन सम्पूर्णभागवत-महापुराणस्य स्वरूपं स्पष्टितम् । श्रीमद्भागवतमहापुराणे अभिमन्यु-पुत्रस्य महाराजपरिक्षितस्य वर्णनं प्रायः सम्पूर्णस्कन्धेषु सम्प्राप्नोति ।

**2. महर्षिवसिष्ठः**

सर्वेषु पुराणेषु तथा सप्तर्षिरूपेण महर्षिवशिष्ठो परिगण्यते । कृतयुगे हिमाचलप्रदेशस्य कुल्लूतजनपदे एतेषां जन्म बभूव । आदिमहा-काव्यरामायणे भगवद्वाल्मीकिनाऽपि भगवत्छ्रीरामचन्द्रस्य कुलगुरु-रूपेणापि महर्षिवशिष्ठ वर्ण्यते । अद्यत्वेऽपि कुल्लूतजनपदस्य **'बीशटः'** इत्याख्ये ग्रामे महर्षिवशिष्ठस्यैकः भव्यदेवालयः स्थितोऽस्ति । महर्षिवसिष्ठाय स्थानीयभाषायां **'बीशटः'** इत्युच्यते। एतस्मात्कारणादेव ग्रामस्यास्य नामकरणं **'बीशटः'** इत्यकरोत् । लोकपरम्परायामस्य महर्षेः श्रद्धापूर्वकं पूजाऽर्चनादिकमद्यत्वेऽपि क्रियते । महर्षेरस्य प्रसङ्गः श्रीमद्भागवतमहापुराणे यथा प्राप्नोति

**तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाप्रजाः ।**
**वसिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात्**[3] ॥

**3 जनमेजयः**

परीक्षितस्य मृत्योरनन्तरं तस्य पुत्रेण जनमेजयेन नागकुलात् प्रतिशोधं नीतुं सर्पदाहयज्ञः कृतः । सम्पूर्णनागकुलस्य विनाशात् आस्तिकनामकः ऋषिपुत्रेण विमुच्यते । जनमेजयः एव पाण्डवकु-लस्यान्तिमः शासकः परिगण्यते । यस्य नामस्मरणं नीलमतपुराणे यथा गृह्यते

**जनमेजय उवाच**

**देशस्य गौरवं चक्रे किमर्थं द्विजसत्तम ।**
**वासुदेवो महात्मा यदभ्यषिञ्चत्स्वयं स्त्रियम्**[4] ॥

तथैव श्रीमद्भागवतमहापुराणे जनमेजयस्य कथाद्वारा स्मरणं सम्प्राप्यते, यथा

**जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ।**
**यथा जुहाव संक्रुद्धो नागान् सत्रे सह द्विजैः**[5] **॥**

इत्थं जनमेजयस्यापि नामस्मरणं क्रियते । यस्य स्वपितरं प्रति स्नेहं तथा समर्पणं स्पष्टतया दृश्यते ।

**4 श्रीकृष्णचन्द्रः**

भगवद्विष्णोः अवताररूपः श्रीकृष्णचन्द्रः चतुर्विंशावतारेषु सर्वोत्तमो मन्यते । यस्यावतरणं द्वापरयुगस्यान्ते धर्मसंस्थापनार्थे बभूव । महाभारतस्य महत्सङ्ग्रामे एतेषां योगदानं सर्वोपरि मन्यते। कुन्तीपुत्राय अर्जुनाय भगवदुपदेशरूपायाः श्रीमद्भगवद्गीतायाः सदुपदेशोऽपि श्रीकृष्णचन्द्रेण कृतः । अद्यतनीये युगे यस्याः महती प्रशंसा सर्वत्र भवति । नीलमतपुराणे श्रीकृष्णचन्द्रस्य नामस्मरणं यत्र-तत्र क्रियते, यथा

**तत्रागतं समाकर्ण्य वासुदेवं स्वयंवरे ।**
**जगाम माधवं योद्धुं चतुरङ्गबलान्वितः**[6] **॥**

श्रीमद्भागवतमहापुराणे कृष्णचन्द्रस्य स्मरणं यथा सङ्गृह्यते

**वासुदेवपरा वेदा वासुदेवपरा मखाः ।**
**वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥**
**वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।**
**वासुदेवपरो धर्मो वासुदेवपरा गतिः**[7] **॥**

**5 जरासन्धः**

जरासन्धं जन्म जरानामकी राक्षसीद्वारा पुनर्जीवनं लब्धम् । एतस्मात्कारणादेव तस्य नाम 'जरासन्धः' इति नाम्ना सञ्ज्ञायते । यद्यपि जरासन्धः अत्यन्तपराक्रमी आसीत् परञ्च तेन नैकनृपान् कारागारे प्रक्षेपितः । तेषां विमुक्तये तथा तेषां महाभारतस्य युद्धे सहायतायै बन्धनमुक्तिः अत्यन्तावश्यकी आसीत् एतस्मात्कारणादेव श्रीकृष्णचन्द्रेण तेषां विमुक्तये वृकोदराय मलयुद्धं कर्तुं प्रेरितः तथा अनेन युद्धेन जरासन्धस्य वधः कृतः । जरासन्धस्य नामस्मरणं नीलमतपुराणेऽपि क्रियते, तद्यथा

**अथोत्थिते किल महाविरोधे दैत्यबन्धुना ।**
**वृष्णीनां कृष्णमुख्यानां जरासन्धेन भूभृता ॥**
**अनेन बन्धुना मानस्थानमेष महीपतिः ।**
**काश्मीरिकोऽभ्यर्थनयाहूतः साहाय्यकाम्यया ॥**
**गत्वासौ बन्धुगृह्यत्वाज्जरासन्धस्य भूपतेः ।**
**चक्रे साहाय्यकं धीमान् जरासन्धस्य भूपतेः**[8] **॥**

जरासन्धस्य कथा श्रीमद्भागवतमहापुराणेऽपि सम्प्राप्नोति । तस्य प्रमाणं यथा

**एवं युधिष्ठिरो राजा जरासन्धवधं विभोः ।**
**कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत्**[9] **॥**

जरासन्धः अत्यन्तदानशीलः ब्राह्मणभक्तश्चासीत् । परञ्च दुष्टैः सह तेषां मैत्री महाभारतसमरे बहुघातकी भवितुमर्हति एतद्धिया तस्य वधः परमावश्यक आसीत् ।

**6 महर्षिकश्यपः**

कश्यपमहर्षिः न केवलं समस्तपृथ्वीलोकस्य पिता अपि तु समस्तदेवासुराणां पिता इति मन्यते । महर्षेरस्य विषये श्रीमद्भागवतमहापुराणे तथा नीलमतपुराणे वर्ण्यते । श्रीमद्भागवतमहापुराणस्य तृतीयस्कन्धे तु देवासुराणाम् उत्पत्तिकाले दितिकश्यपयोः संवादो वर्णितोऽस्ति । तद्यथा

**दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिम् ।**
**अपत्यकामा चकमे सन्ध्यायां हृच्छयार्दिता**[10] **॥**

तथा हि नीलपतपुराणे महर्षिकश्यपस्य विषये चर्चा इत्थं सम्प्राप्यते

**समुद्युक्तैर्यथापूर्वं समुद्भूता महीस्थितिः ।**
**तत्र दक्षो ददौ कन्याः कश्यपाय त्रयोदश**[11] **॥**

महर्षेरस्यैव सर्वे दानवाः असुराः देवगणाश्च नानापुत्रसन्ततिरस्तीति मन्यते । तद्यथा

**मारीचाय समाधत्स्व श्रोतुं नामानि भूपते ।**
**तासां यस्याश्च ये जातास्तेषां नामानि मे शृणु ॥**
**अदितेस्तनया देवा दितेर्दैत्यास्तथैव च ।**
**गन्धर्व्या वाजिनः पुत्रा भद्राश्च सुरभेः सुताः ॥**
**यक्षाश्च राक्षसाश्चैव खसायास्तनयाः स्मृताः ।**
**ऐरावणस्त्विलापुत्रः पुल्वाया दश गायनाः**[12] **॥**

अत एव उपरोक्तविविधपद्यैः सञ्ज्ञायते यत् महर्षिकश्यपस्य समस्तजीवानामुत्पत्तिरभवत् इति निश्चितम् ।

**7 महर्षिविश्वामित्रः**

महर्षिरयं कृतयुगे भारतवर्षस्य महान् ऋषिरूपेण परिगण्यते । येन गायत्रीमहामन्त्रस्यापि अन्वेषणं सृजनं वा कृतम् । नीलमतपुराणेऽपि अस्य प्रसङ्गः सम्प्राप्यते तद्यथा

**नित्यमेव तथा पुण्यो विश्वामित्रो महानदः ।**
**उदाख्यस्तु महापुण्यः सङ्गमाश्च पृथक् पृथक्**[13] **॥**

तथैव श्रीमद्भागवतमहापुराणे यथा

**विश्वामित्रस्य चैवासन् पुत्रा एकशतं नृप ।**
**मध्यमस्तु मधुच्छन्दा मधुच्छन्दस एव ते**[14] **॥**

महर्षेरस्य प्रसङ्गः कठिनतपश्चर्यायै नूतनस्वर्गनिर्माणाय तथा च वशिष्ठेन साकं कृतद्रोहप्रसङ्गे समाप्नोति । अस्यापरनाम 'कौशिकनन्दनः' 'मधुश्छन्दा' चेत्यपि आस्ताम् ।

**8 हिमवान्**

पर्वतराजो हिमवान् भगवतीपार्वत्याः पितुरासीत् । यस्यात्यन्त-भक्तिभावेन भगवता रुद्रेण साकं पार्वत्याः विवाहः अकार्यत् । यस्य प्रसङ्गो नीलमतपुराणेऽपि समाप्नोति, यथा

**हिमवान्हेमकूटश्च निषधो नीलपर्वतः ।**
**श्वेतश्च शृङ्गवान्मेरुर्माल्यवान् गन्धमादनः**[15] **॥**

तथा च श्रीमद्भागवतमहापुराणे तु हिमवतः नामस्मरणं यथा क्रियते

**एवं दाक्षायणी हित्वा सती पूर्वकलेवरम् ।**
**जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम**[16] **॥**

हिमवतः कथा विविधग्रन्थेषु यथा शिवपुराणे, गणेशपुराणे, ब्रह्मवैवर्तमहापुराणे, पद्मपुराणे, वायुपुराणे चेत्यादिषु सम्प्राप्नोति ।

**9 महर्षिवेदव्यासः**

महाभारतमहाकाव्यस्य रचयितुः सम्बन्धो हिमाचलप्रदेशस्य बिलासपुरजनपदान्मन्यते । अद्यतनीये बिलासपुरजनपदे बहुकालपूर्वं **'व्यासपुरः'** इति नाम्ना सञ्ज्ञायते स्म । महर्षिवेदव्यासस्य नामाधारेणैव **'व्यासपुरः'** इति नाम्ना सञ्ज्ञायते स्म । तत्र एका व्यासगुहा आसीत् यत्र महर्षिवेदव्यासेन स्वजीवनस्य एकस्मिन् कालखण्डे तपस्या कृता । लोकगाथासु लोकसाहित्ये, इतिहासे चास्य

प्रमाणानि समुपलभ्यन्ते । केनचित् कथ्यते यत् अस्याः गुहायाः अपरपक्षे महर्षिमार्कण्डेयर्षेः वास आसीत् । महर्षिवेदव्यासस्य गुहायाः अन्तःपुर एव महर्षिमार्कण्डेयस्य निवासं यावत् मार्ग आसीत्। मार्कण्डेयर्षेः तपस्स्थली अद्यत्वेऽपि विद्यमानास्ति । अद्य व्यासगुहा **'गोविन्दसागरः'** इत्याख्ये सरसि विलीना वर्तते । एतदतिरिक्तं रोहताङ्गदर्रा इत्याख्ये स्थानेऽपि एको व्यासकुण्डो विद्यमानोऽस्ति । व्यासकुण्डोऽयमपि महर्षिवेदव्यासेन स्थापितानां स्थापनानामेकं जीवन्तप्रमाणानि प्रवर्तन्ते ।

महर्षिवेदव्यासात्सम्बन्धितदिव्यधामो मण्डीजनपदे **'कमरूनागः'** इत्याख्ये मन्दिरे नामतोऽपि विख्यातोऽस्ति । स्थानीयजनाः दिव्यधाममम्‌ **'कमरूनागः', 'कमराहदेवः', 'शैशना होली'** तथा **'शैशिनालः'** एतेभ्यश्चतुर्भ्यः नामभ्यः सञ्ज्ञायते । अत्र विद्यमाने प्राचीनदेवालये श्रीकृष्णद्वैपायनस्य पाषाणप्रतिमा विद्यते । देवालयस्य समक्षमेकदिव्यसरोवरोऽस्ति । यात्रीजनाः स्वमनोकामनायाः पूर्णत्वे सति स्वेच्छानुसारं दानं प्रतिमायाः समक्षं दिव्यसरोवरे क्षिपन्ति । लोकेतिहासे विषयस्यास्य भावाः समुपलभ्यन्ते यत् महर्षिवेदव्यासेन पैलवैशम्पायनजैमिनीसुमन्तून् शिष्यान् वेदानां शिक्षा अत्रैव प्रदत्ता [17] ।

महर्षिवेदव्यासः पर्यटनशील आसीत् । यदि क्षेत्रेऽस्मिन् स्वशिष्यान् महर्षिवेदव्यासेन वेदाध्ययनमकारयत्तत्र काऽपि अतिश्योक्तिः नास्ति। **'कमराहदेवः' 'कमरूनागः'** वेति वेदव्यासस्य तस्य शिष्याणामपि तपःस्थली आसीत् । यतो हि मण्डीजनपदस्य विविधक्षेत्रेषु विविधलोककथामाध्यमेनास्मिन् विषये सूचना सम्प्राप्नोति । वेदव्यासस्य पुत्रः 'शुकदेवः' इत्याख्यमुनिः आसीत् । अद्यत्वेऽपि मण्डीजनपदस्य एकस्य क्षेत्रस्य नाम **'सुकेतः'** इत्यपि व्यासपुत्रस्य नामोपरि प्रदीयते । स्थानीयजनानामनुसारं शुकदेवस्य नामोपरि स्थानस्यास्य नामकरणमभवत् ।

महर्षिवेदव्यासो भगवद्विष्णोः कलावताररूपं मन्यते । तेन न केवलं महाभारतस्य रचनाञ्चकार, अपितु **'बृहत्पाराशरमहाशास्त्रम्'**, अष्टादशमहापुराणानामपि रचना कृता । एताः सर्वाः कृतयः विश्वप्रसिद्धाः सन्ति । महाभारते महर्षिवेदव्यासद्वारा सञ्जयं प्रदत्तवरदानस्वरूपा-शीषस्य वर्णनमपि सम्प्राप्यते, यत्र महर्षिवेदव्यासस्य अद्भुतप्रतिभायाः चमत्कृतशक्तीनां वर्णनं प्राप्यते। अनया शक्त्यैव सञ्जयं दिव्यदृष्टेः वरदानमपि वेदव्यासादेव सम्प्राप्यते । अत एव दिव्यशक्तिसम्पन्नरूपेण महर्षिवेदव्यासमङ्गीक्रियते ।

नीलमतपुराणे व्यासस्य प्रसङ्गः इत्थं प्राप्नोति

**परीक्षिद्वंशभृच्छ्रीमान् नृपतिर्जनमेजयः ।**
**पप्रच्छ शिष्यं व्यासस्य वैशम्पायनमन्तिकात्**[18] ॥

तथैव श्रीमद्भागवतमहापुराणे यथा

**नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।**
**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्**[19] ॥

### 10 ब्रह्मज्ञानी शुकदेवमुनिः

शुकदेवमुनिः महर्षिवेदव्यासपुत्रः आसीदिति मया पूर्वमप्युक्तोऽस्ति। मण्डीजनपदस्थं 'सुकेतः' इति क्षेत्रं शुकदेवमुनिना सम्बन्धितमस्ति । लोकेतिहासानुसारं तथा लोकपरम्परायाः अनुसारं मन्यते यच्छुकदेवमुनिना क्षेत्रेऽस्मिन् तपस्यां कृत्वा गहनचिन्तनं, मननमध्ययनञ्च कृतम् । सुकेतक्षेत्रं इतः पूर्वं शुकक्षेत्रमासीत्तथा शब्दोऽयं लोकवाण्यां 'सुकेतः' इति रूपेणाङ्गीक्रियते । जनानां मान्यता वर्तते यत् इतः शुकदेवमुनिः जनकपुरीमगच्छत् । कुल्लूतजनपदेऽपि शुकदेवमुनेः देवालयो विद्यते । देवालयोऽयं 'सन्याणी' इत्याख्ये स्थाने स्थितोऽस्ति ।

श्रीमद्भागवतमहापुराणे प्रसङ्गो यथा प्राप्नोति महर्षेरस्य

**यानि वेदविदां श्रेष्ठो भगवान् वादरायणः ।**
**अन्ये च मुनयः सूत परावरविदो विदुः**[20] ॥

### 11 देवर्षिनारदमुनिः

परम्पितुः ब्रह्मणः पुत्रस्य नारदमुनेः चरितं ब्रह्माण्डीयसूचनातन्त्राय विशेषमहत्त्वं भजते । कुल्लूतजनपदस्य 'नीणूः' तथा च 'काण्डा' इत्याख्ययोः ग्रामयोः देवर्षिनारदस्य भव्याः देवालयाः स्थापिताः सन्ति । स्थानीयजनाः देवर्षिनारदस्य चरितेन विशेषरूपेण प्रभाविता भवन्ति। श्रीमद्भागवतमहापुराणस्य प्रसङ्गानुसारं पूर्वजन्मनि देवर्षिनारदः दासीपुत्रो बभूव, भगवत्कृपयैवाग्रिमजन्मनि साक्षात्परम्पितुः पुत्ररूपेण जन्म बभूव । तदा भगवद्विष्णुना तमेका वीणा प्रदत्ता । यस्यां निरन्तररूपेण भगवन्नामोच्चारणं कृत्वा यत्र-तत्र सर्वत्र भ्रमति । भगवद्विष्णोः चतुर्विंशत्यवतारेषु देवर्षिनारदस्यावतारोऽपि परिगण्यते । अत एव देवर्षिनारदो भगवद्विष्णोः स्वरूपमेव वर्तते । तेन बहुभिः आशीषैः नानामनुष्याणामुद्धारोऽपि कृतः, तत्तु दिव्यशक्तिभिः एव सम्भवमिति ।

नीलमतपुराणे प्रसङ्गो यथा प्राप्नोति महर्षेरस्य

**सन्नीतिं तां तथा दृष्ट्वा चक्रतीर्थं तथैव च ।**
**यदर्थे नारदाद्गीता गाथा चरति भूतले**[21] ॥

श्रीमद्भागवतमहापुराणे यथा प्रसङ्गः सम्प्राप्यते

**शृणु नारद वक्ष्यामो विनम्राय विवेकिने ।**
**गङ्गाद्वारसमीपे तु तटमानन्दनामकम्**[22] ॥

### 12 सतीः

दक्षपुत्र्याः भगवतीसतीदेव्याः कथा उभयोः पुराणयोः प्राप्नोति । यस्याः विवाहः रुद्रेण साकमभवत् । यद्यपि भागवतमहापुराणे तु कथा सुस्पष्टा दृश्यते तथापि नीलमतपुराणे सामान्यकथनं वाचितमस्ति । यथा

**तदा विनष्टे लोकेऽस्मिन्महादेवः स्वयं प्रभुः ॥**
**आपो भूत्वेच्छया लोके तिष्ठत्यस्मिन्समन्ततः ।**
**सती देवी च तत्कालं तस्मिन्नौत्वं करोति हि**[23] ॥

अपि च

**विदधाति प्रजावर्गे यथापूर्वमरिन्दम ।**
**नौदेहेन सती देवी भूमिर्भवति पार्थिव**[24] ॥

श्रीमद्भागवतमहापुराणे च यथा

**गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ।**
**व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदङ्गजम्**[25] ॥

### 13 महाराजमनुः

महाराजमनुं सम्पूर्णविश्वस्य पितृरूपेण अङ्गीक्रियते । यस्य तिस्रः कन्यकाः तथा द्वौ पुत्रौ च आसन् । हिमाचलप्रदेशस्य कुल्लूतजनपदस्य मनाली इत्याख्यं स्थानमपि एतेषामुपरि निगद्यते । नीलमतपुराणे महाराजमनोः वर्णनमित्थं संलभ्यते

**मनुर्भविष्यंस्तस्मिंस्तु सर्वबीजानि मायया ।**
**तदा स्थापयते राजंस्तां च नावं जगद्गुरुः**[26] ॥

तथैव श्रीमद्भागवतमहापुराणे भगवतीसतीदेव्याः प्रसङ्ग इत्थं समाप्नोति

**मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे ।**
**आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः[27] ॥**

**14 वासुकिः**

अयं नागेशः सर्पाणां राजा इति उच्यते । प्रायः नीलमतपुराणस्य विविधपद्येषु अस्य वर्णनं सम्प्राप्नोति । अयं महादेवस्य कण्ठहारो भवति । यस्य स्थानं कैलाशपर्वतं तथा काश्मीरदेशः मन्यते । अयं नागानामीशः अङ्गीक्रियते तद्यथोच्यते नीलमतपुराणे

**तमाह भगवान्देवो वासुकिं भयविह्वलम् ।**
**सतीदेशेऽत्र पुणयोदे सरस्यमरभूषिते[28] ॥**

तथैव श्रीमद्भागवतमहापुराणे समुद्रमन्थनप्रसङ्गे अस्य नामस्मरणमित्थं क्रियते, तद्यथा

**क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः ।**
**मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्[29] ॥**

**15 तक्षकः**

अयमपि वासुकिमिव नागानां श्रेष्ठतमं नृपरूपेण स्वीक्रियते । अयं देवराजेन्द्रस्य परमसखारूपेण स्वीक्रियते शास्त्रेषु । अस्यापि विषये नीलमतपुराणे प्रसङ्गो यथा सम्प्राप्यते

**स गत्वा पितरं दृष्ट्वा पितुः पादौ निपीड्य च ।**
**निवेद्य नामधेयं स्वं ववन्दे भुजगाधिपः[30] ॥**

तक्षकस्य विषये श्रीमद्भागवतमहापुराणे यथा सम्प्राप्नोति

**इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ।**
**बभूव सम्भ्रान्तमतिः सविमानः सतक्षकः[31] ॥**

**निष्कर्षः**

नीलमतपुराणे तथा श्रीमद्भागवतमहापुराणे यद्यपि बहवो महापुरुषाः विद्यन्ते येषां विविधप्रसङ्गाः तत्र सन्ति । परञ्चात्र केवलं मुख्यविभूतीनामेव प्रसङ्गो निगद्यते । तथापि नीलमतपुराणे विविधकर्मकाण्डविषयाः विद्यन्ते । तथैव श्रीमद्भागवतमहापुराणेऽपि अनेकेषां महापुरुषाणां प्रसङ्गाः विद्यन्ते । येषां विषये मया स्वशोधप्रबन्धे विस्तृतरूपेण लिखितमस्ति । तत्र अनेके साधकाः अपि विद्यन्ते । अखिलभारतवर्षे ये साधकाः विद्यन्ते, तेषां मूलभूताश्रयन्तु हिमालयपर्वत इति । यदि एतदतिरिच्य कुत्रापि साधकाः विद्यन्ते ते तु काञ्चीपुरस्थकामाख्यादेवीशक्तिपीठे, कालीकटप्रदेशे वैद्यनाथे चेत्यादिसुप्रसिद्धस्थानेषु अनेके साधकाः विद्यन्ते । तेषु केचन दृग्गोचराः केचन अदृश्याः सन्ति, अदृश्यसाधकाः कदाचित् महाकुम्भसमये प्रयागराजे दृग्गोचरीभवन्ति । ते साधनावशात्कदापि सांसारिकजनेषु आगत्य नैव निवसन्ति ।

तपश्चर्यायै साधकाः सदैव अनेकमासपर्यन्तम् एकान्तस्थानेष्वेव निवसन्ति, यतो हि साधनायां कदाचित् किमपि कोलाहलादिकं नैव प्राप्नुयात् । साधकाः स्वेष्टदेवस्य साधनायै विविधोपचारैः, विभिन्ननियमैः तथा च अनेकप्रयत्नैः गुरोः आज्ञाफलेनैव स्वदेवं प्रसन्नं कर्तुं प्रयासः कुर्वन् सफलीभवति । सफलताप्राप्त्यनन्तरं केचन सांसारिकजनानां सहायता कुर्वन्ति, केचन सांसारिकजनानेभ्यः दूरे गत्वा पर्वतादिषु निवसन्तः घोरतपश्चर्याद्वारा मोक्षः प्राप्नुवन्तीति मे निश्चयः । केषाञ्चन् साधकजनानामेव अत्र नामग्रहणपुरस्सरं तेषामुपलब्धिनामपि विश्लेषणं विहितम्मया । एतादृशानां साधकानां सङ्ख्या तु साधारणजनानामपेक्षया न्यूना वर्तते, तथाऽपि परोक्षप्रत्यक्षरूपेण ये समाजस्य कल्याणं कर्तुं समर्थाः तथा दृग्गोचरीभवन्ति । एते समाजसुधारकाः तथा च समाजहितैषिणः सर्वथा पूजनीयाः आदरणीयाश्च भवन्तीति ।

**सहायकग्रन्थसूची**


क. श्रीमद्भागवतमहापुराणम्, गीताप्रेस गोरखपुर, चतुस्त्रिंशत्तमं संस्करणम्, संवत् २०३७

ख. नीलमतपुराणम्, मोतीलाल बनारसी दास, द पंजाब संस्कृत बुक डिपो, लाहौर, १९२४

ग. महाभारतम्, गीताप्रेस गोरखपुर, द्वादशसंस्करणम्, संवत् २०२१

घ. संस्कृतहिन्दीशब्दकोषः, शिवराम आप्टे, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी, संवत् २०२८

ङ. श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुर, एकपञ्चाशत्तमं संस्करणम्, संवत् २०७०


**पादटिप्पण्यः**

1. श्रीमद्भागवतमहापुराणम्, १.८.९
2. नीलमतपुराणम्, ०२
3. श्रीमद्भागवतमहापुराणम्, ९.९.३८
4. नीलमतपुराणम्, ३०
5. श्रीमद्भागवतमहापुराणम्, १२.६.१६
6. नीलमतपुराणम्, २५
7. श्रीमद्भागवतमहापुराणम्, १.२.२८-२९
8. नीलमतपुराणम्, १३-१५
9. श्रीमद्भागवतमहापुराणम्, १०.७४.१
10. श्रीमद्भागवतमहापुराणम्, ३.१४.७
11. नीलमतपुराणम्, ६९
12. नीलमतपुराणम्, ७०-७२
13. नीलमतपुराणम्, १५१
14. श्रीमद्भागवतमहापुराणम्, ९.१६.२९
15. नीलमतपुराणम्, ५६
16. श्रीमद्भागवतमहापुराणम्, ४.७.५८
17. वेदानध्यापयामास व्यासः शिष्यान्महामतिः ।
    सुमन्तुञ्च महाप्राज्ञं पैलञ्चापि तपस्विनम् ।।
    यत्र शिष्यैः परिवृतो व्यासः आस्ते महातपाः ।
    तत्राश्रमपदं रम्यं ददर्श पितुरुतमम् ।।
    आरणेयो विशुद्धात्मा नभसीव दिवाकरः ।
    अथ व्यासः परिक्षिप्तं ज्वलन्तमिव पावकम् ॥
    ददृशे सुतमायतं दिवाकर समप्रभवम् ।
    आसञ्जमानं वृक्षेषु शैलेषु विषमेषु च ।। (महाभारतम्, शान्तिपर्वणि, 192.327.25-30)
18. नीलमतपुराणम्, २
19. श्रीमद्भागवतमहापुराणम्, १.२.४
20. श्रीमद्भागवतमहापुराणम्, १.१.७
21. नीलमतपुराणम्, १७२
22. श्रीमद्भागवतमहापुराणम्, माहात्म्यम्, ३.४
23. नीलमतपुराणम्, ५८-५९
24. नीलमतपुराणम्, ६४
25. श्रीमद्भागवतमहापुराणम्, ४.४.२३
26. नीलमतपुराणम्,
27. श्रीमद्भागवतमहापुराणम्, ४.१.१
28. नीलमतपुराणम्, १०५
29. श्रीमद्भागवतमहापुराणम्, ८.६.२२
30. नीलमतपुराणम्, १४०
31. श्रीमद्भागवतमहापुराणम्, १२.६.२२